International Journal of Sanskrit Research 2021; 7(3): 45-53

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(3): 45-53
© 2021 IJSR
www.anantaajournal.com
Received: 26-03-2021
Accepted: 28-04-2021

**Harapriya Hati**
Net, Ph.D. Scholar, Department of Sanskrit, Pondicherry University Pondicherry, India

**Corresponding Author:**
**Harapriya Hati**
Net, Ph.D. Scholar, Department of Sanskrit, Pondicherry University Pondicherry, India

# काव्यप्रकाशस्य साहित्यदीपिकायाः प्रथम उल्लासः

**Harapriya Hati**

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति –

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कर्वेजयति।।१।।

नियतिशक्त्या नियतरूपा, सुखदुःखमोहस्वभावा, परमाण्वाद्यु-पादानकर्मादिसहकारिकारणपरतन्त्रा, षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम्। एतद्विलक्षणा तु कविवाङ्निर्मितिः। अत एव जयति, जयतीत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते।।

## 'साहित्यदीपिका' टीका

[1]हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।
[2]अथ काव्यप्रकाशव्याख्या।
[3]स्तनन्धयसुधाधामधाम्ने [4]धाम्ने हि मन्यवे
एकतोऽन्यत्र [5]किण्वादिदारिणे दारिणे नमः।।
न ते टीकाकाराः परिगलदविद्यान्धतमसम्।
प्रमेयं शास्त्राणां प्रतिफलति [6]येषान्नमतिषु।।
न [7]टीकायास्तासां विलसितमनालोकविषयान्
[8]गभीरान् शब्दार्थान् गमयति न सिद्धाञ्जनमिव।।
[9]टीकाः काव्यप्रकाशस्य कामं सन्तु [10]परश्शताः।
[11]किं ताभिस्सुगमग्रन्थमात्रव्याख्यानचुञ्चुभिः।।
यद्यस्ति तत्र सारांशस्सोऽपि [12]संगृह्यते मया।
तेन टीकान्तरालोककौतुकं [13]त्यज्यतान्तमाम्।
[14]साहित्यदीपिका नाम टीका [15]भास्करसूरिणा।
[16]मधूद्वहानां काव्यानां [17]तेजनीयं विरच्यते।।

इह तावदादिमेन [18]श्लोकेन नमस्कारस्य [19]वा [20]प्रेक्षावत्प्रवृत्तेरङ्गभूतस्य प्रयोजनस्य [21]वा काव्यलक्षणस्य वा प्रतिपादनं युज्यते, न [22]पुनस्सर्वोत्कर्षेण [23]प्रवृत्तेस्तदयन् नियतिकृतेत्यादेरुपन्यासो न [24]सङ्गच्छते, इत्याशङ्क्याह।

ग्रन्थारम्भ इत्यादि। अत्र परामर्शो नाम सर्वोत्कर्षेण [25]स्तुतिः, न पुनरनुसन्धानं तस्य स्मरणरूपत्वात्। नियतिकृतेत्यादौ [26]तद्घटनात्। यत्र [27]सर्वोत्कृष्टत्वं तत्र नमस्कार्यत्वमिति [28]व्याप्तेः [29]नमस्काराक्षेपकार्यत्वात् श्लोकस्य तत्परता गम्यते। तथा च [30]वक्ष्यते जयत्यर्थेन नमस्कार [31]आक्षिप्यत [32]इति तां प्रत्यस्मि प्रणत इति [33]लभ्यते इति[34]।

[35]निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।
अनेकार्थास्स्मृतास्सर्वे पाठस्तेषां निदर्शनम्।। [36]इति।

[37]जयतिरत्र [38]सर्वोत्कर्षो वर्तते। एवं तर्हि नमस्कारस्साक्षादुपा-दीयतां किमाक्षेपेणेति चेत्, न [39]सर्वोत्कृष्टत्वप्रतिपादनेन [40] भिहि $^{\Psi}$_सर्ववन्द्यत्वं प्रकाश्यते। [41]वन्दे भारतीमित्युक्ते तदप्रकाशितं स्यात्।
तर्हि नियतिकृतनियमरहितादि [42]विशेषणविशिष्टां निर्मितिमादधातीं , <निर्मितिमादधतीम् ?>* [43]सर्वोत्कृष्टां कवेर्भारतीं वन्दे इति किं नोच्यत इति चेत् न [44]सर्वोत्कृष्टत्वप्रतिपादने तात्पर्यात्, समुचितशब्देनासाधारणयुक्ता च संगृहीता [45]भक्तिः [46]श्रद्धातिशयविषयभूतेष्टा, गणेश्वरादिस्साधारणा पामरोऽपि [47]हि गणेश्वरादिकां देवतां [48]नमस्कृत्य स्वकीयं कर्म [49]प्रारभ्यते। यत्र या देवता प्रतिपाद्यते तत्र सा युक्ता। काव्यमीमांशासास्त्रारम्भे <काव्यमीमांसाशास्त्रारम्भे?>* [50]कविवाग्देवतैवाधिकृतेति युक्ता भवति।।
[51]नियतीत्यादिः। पदार्था <पदार्थो?>* नाम साधारणो धर्मः। [52]कमलत्वादिजातिः नियतिः नियम्यते [53]कमलसौगन्ध्यादिकमनयेति। [54]विधिरिति केचित् तेन [55]हि [56]स्वयं दरित्येवायमीष्ट $^{\Psi}$ एवेति नियम्यते। [57]तत्कृतनियमरहितां यतो मुखादेः [58]कमलादिना तादृप्यं ह्लादैकमयीमित्यत्र कथं विग्रहः? [59]केचिदाहुः। ह्लादैकशब्दयोः पूर्वं सुप्सुपेति [60]समासः। [61]तत्र [62]प्राचुर्योमयडिति¥ [63]तदसत्मय व्यतिरेकेणापि [64]ह्लादैकमयीमिति [65]प्रयोगप्रसङ्गात् [66]पूर्वकालैकेत्यादिना [67]समास एकशब्दस्य [68]पूर्वनिपातेन भवितव्यं तस्मादेवं [69]विग्रहः कर्तव्यः। एकं प्राचुर्येण प्रस्तुतां [70]यस्य उच्यते यस्यां सा एकमयी ह्लादेन ह्लादैकमयी इति।
अपरतन्त्रामित्युक्ते यथा परमाण्वादि पारतन्त्र्यनिरासः तथा कविपारतन्त्र्यनिरासोऽपि भारत्याः स्यात् इत्यन्यशब्दोपादानं कवेरन्यस्य [71]परस्य परमाण्वादेः अधीना न भवति [72]कवेस्त्वदधीनैवेत्यर्थः अन्येत्वेहुः। परतन्त्रशब्दोऽयं [73]परायन्तमात्रवचनः। यथा, [74]मत्परतन्त्रस्त्वत्परतन्त्र इति। [75]अतो नान्यपदेन [76]पौनरुक्त्यमिति।
नवरसा [77]रुचिरा च [78]ब्रह्मसृष्टिषड्रसा, न च हृद्यैवेति। [79]एतद्वैलक्ष्येण [80]एतद्विशेषणद्वयं विधेयमेव। अन्यथा [81]व्याख्याने नवरसी रुचिरेति [82]भवितव्यम्। दिकसंख्ययोस्संज्ञायामेव <दिक्संख्ये संज्ञायाम्¥?>*) समासविधानात् तेषु तेषु वस्तुषु [83]निर्मितमिति नूतनत्वेन [84]निर्मितं [85]विदधातीति व्याख्येयम्।
[86]निर्मितिं कुर्वतीति पौनरुक्त्यप्रसङ्गादिति केचिद्व्याचक्षते। तदयुक्तं नियतिकृतेत्यादि विशेषणविशिष्टां निर्मितिं कुर्वतीति सामान्यविशेषभावेन [87]पौनरूक्त्याभावादिति। यथा [88]अर्घ्यादिकया सपर्यया [89]पर्यपूजदित्यादि। [90]अनेन श्लोकेन एतद्ग्रन्थप्रतिपाद्यं वस्तु, अलङ्काररसरूपध्वनित्रयं प्रदर्शितं भवति।
जयत्यर्थेन। नमस्काररूपं वस्तु ध्वन्यते, तथा केनचिद्यत्र धर्मेण द्वयेन संसिद्धिसाम्ययोः भवत्येकतराधिक्यं व्यतिरेकस्स उच्यते। ब्रह्मसृष्टेस्सकाशाद्वा निर्मितेर्व्यतिरेकालङ्कारः। रतिर्दैवादिविषयाभाव इत्यभिधीयते इति भारतीं प्रति कवेः रतिलक्षणो भावः। प्रतियोगिस्वरूपानवगमे तक्ष्यतिरेकस्य [91]ज्ञातुमशक्यत्वात् पूर्वं ब्रह्मसृष्टिस्वरूपं निरूपयति।
नियतिशक्त्येत्यादि। सुखदुःखमोहस्वभावत्वं सत्वरजस्तमो गुणात्मकतया जगतः कर्मादि [92]सहकारीत्यत्र दृष्टं कर्मशब्दो नोच्यते। आदिशब्देन दिक्कालादीनां [93]ग्रहणम्। [94]तैः रसैः न च हृद्यैवेत्यन्वयः। ननु नमस्कारे आक्षिप्ते कोऽन्वयः [95]कवेर्भारती जयति। नमस्कार इत्युक्तं स्यादित्यत आह [96]इति तां प्रत्यस्मीत्यादि। सामर्थ्यादयमर्थो [97]लभ्यत इत्यभिप्रायः। ननु काव्यलक्षणस्य प्रयोजने [98]अभिधानीये [99]ते काव्यप्रयोजनाभिधानं [100]शालेयेनेष्टस्य फलस्य काञ्चिकधान्यमृगाणमनुकरोति। इह नष्टानि प्रयोजनानि काव्ये मृग्यन्त [101]इत्याशङ्क्याह।

**'मूलम्'**

इहाभिधेयं सप्रयोजनमित्याह –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।२।।

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थ-निवारणम्, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुण-कविकर्म, तत्कान्तेव

सरसतापादनेनाभिमुखीकृत्य, रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।।

**'साहित्यदीपिका' टीका**

इहाभिधेयमित्यादि। इदमाकूतं यशः [102]प्रभृतिप्रयोजनविशिष्ट-काव्यज्ञानस्वरूपं लक्षणस्य प्रयोजनम्। काव्यमात्रज्ञानमिति लक्ष्यस्य [103]काव्यस्य प्रयोजनान्येव [104]लक्षणस्यापि [105]प्रयोजनानीति।

काव्यं [106]यशस इति। अत्र [107]कृद्विद्युज् शब्दास्संपदादित्वात् भावे क्विबन्ताः। शब्दार्थयोर्गुणभावे [108]हेतुमाह। रसाङ्गभूतव्यापार- प्रवणतयेति। रसस्याङ्गभूतो व्यापारो व्यञ्जनावृत्तिः तत्र [109]तात्पर्यात् शब्दवाच्यार्थयोर्गुणभावः। [110]लोकोत्तरवर्णननिपुणकविकर्मेत्यत्र [111]निपुणशब्दः कविकर्मणो विशेषणम्। न [112]तु कवेः 'अन्यथा' [113]कविनानुष्ठीयमानं सर्वमपि क्रियाजातं काव्यं स्यात्। ननु ब्राह्मणादित्वात् [114]कर्मणि ष्यञि कृते कविकर्ममात्रं [115]लभ्यते। न तु [116]लोकोत्तरवर्णननिपुणत्वविशेषणविशिष्टमिति चेत् न काव्यशब्दस्य तत्रैव रूढत्वात् यथा योगमिति। [117]योग औचित्यमिति [118]तामनतिक्रम्य यशोऽर्थावनर्थक्षतिश्च द्वयोरपि व्यवहारोपदेशौ। [119]सहृदयस्यैव निर्वृतिकाले कविरपि सहृदय एवेति निर्वृतिः। द्वयोरपि काव्यं यशस [120]इत्यभिधानापर्यवसानादपरिपूर्णं वाक्यं विधिपर्यवसानेन पूरयतीति।

**'मूलम्'**

एवमस्य प्रयोजनमुक्त्वा कारणमाह –

> शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
> काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।।३।।

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादि- लक्षणग्रन्थानां काव्यानां च महाकविसम्बन्धिनाम्, आदिग्रहणादिति-हासादीनां च विमर्शनाद्व्युत्पत्तिः, काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः।।

**'साहित्यदीपिका' टीका**

[120]सर्वथेत्यादि। एवं प्रयोजनवत्तया प्रवृत्तानां प्रेक्षावतामुपायजिज्ञासायामाह। शक्तिरित्यादि। शक्तिसद्भावे [121]किं [122]प्रमाणमित्याह। यां विनेत्यादि कार्यैकसमधिगम्येत्युक्तं भवति।

निपुणता व्युत्पत्तिः।

लोकदर्शनस्याशक्यत्वात्। लोकशब्देन लोकवृत्तं गृह्यते इत्याह। लोकवृत्तस्येति। काव्योपयोगीनि शास्त्राणि दर्शयतिः च्छन्दोव्याकरणेत्यादिना <दर्शयति छन्दोव्याकरणेत्यादिना?>* इति, हेतुस्तदुद्भव इत्यत्र [123]इति [124]शब्दस्य स्थितस्यार्थमाह। इति त्रयस्स <त्रयः?>* [125]समुदिताः न तु व्यस्ता इति। अनेनेति शब्दस्य [126]समुदिताकारद्योतकत्वं दर्शयति।

हेतुरित्यत्रैकत्वं विवक्षितमित्याह। न तु हेतव इति। हेतुशब्देन अत्र सामग्री गृह्यते। अन्यथा शक्त्यादीनां प्रत्येकं [127]हेतुत्वात् न हेतव इति निषेधो [128]नोपपद्यते।

**'मूलम्'**

एवमस्य कारणमुक्त्वा स्वरूपमाह –

(सू.१) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।।

दोषगुणालङ्काराः वक्ष्यन्ते। क्वापीत्यनेनैतदाह यत्सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः। यथा –

> यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
> स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
> सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
> रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।। १ ।।
>
> अत्र स्फुटो न कश्चिदलङ्कारः, रसस्य च प्राधान्यान्नालङ्कारता।।

**'साहित्यदीपिका' टीका**

[129]न तु तददोषौ [130]शब्दार्थावित्यादिना [131]किं सामग्र्येव प्रतिपाद्यते। किं वा लक्षणं, [132]नाद्यः [133]तददोषवित्यादि व्यतिरेकेण काव्यस्यैवाभावात्। [134]नापि द्वितीयः।

[135]अनलंकृतीव पुनः [136]क्वापीत्यनेनालङ्कारराहित्यप्रतिपादने लक्षणमव्यापकं [137]स्यादित्याशंक्याह। [138]एवमस्येत्यादिना स्वमसाधारणं रूपं स्वरूपं लक्षणमित्यर्थः। क्वापीत्यनेनैतदाह। इत्यनेनाव्याप्तिः स्वयमेव [139]परिहरिष्यति। असमीचनस्यापि दोषस्य प्रागुपादानम्। सत्यपि गुणालङ्काराणां पौष्कल्ये दोषस्य [140]लवोऽप्य काव्यतायै कल्पत इति दर्शयितुम् [141]गुणाः रससमवायिनो धर्माः। अलङ्कारा रससंयोगवृत्तयः। ननु [142]स्फुटालंकारविरहेऽपि अलंकृतिमात्रमस्त्येव।

तत् कथं [143]अनलंकृतीत्युच्यते। अनलंकृतीत्यत्र नञ् [144]ईषदर्थे वर्तते। [145]अनुदराकन्येतिवत्।

अस्फुटत्वादलंकारस्याल्पत्वं, [146]क्वचिन्नायिका रेवातीरकृतसङ्केता, परपुरुषरतिमपह्णुवाना सखीं प्रत्याह यः कौमारेत्यादि। यः कौमारहर इत्यनेन [147]प्रथमतो यः कौमारमपनीतवान् सः कौमारहरः।
कदम्बशब्दः इह [148]धूलीकदम्बाख्ये कदम्बविशेषे [149]वर्तते। यो वसन्ते पुष्यति [150]कदम्बमात्रग्रहणे ता एव चैत्रक्षपा इति न [151]सङ्गच्छते। चैत्रे तेषामसंभवात्। [152]तत्र रेवातीतीरे <रेवातीरे?>* [153]सुरतव्यापारलीलाकरणे विषये। अत्र [154]स्फुटेन कश्चिदिति अत्र विभावनाविशेषोक्ती [155]संभाव्येते। अत्र वरादि सामग्री समस्ति। उत्कण्ठारूपं च कार्यं नोत्पद्यते इति। [156]कारणसामग्र्यं कार्यानुत्पत्तिर्विशेषोक्तिः¥, [157]रेवारोधसि [158]उक्तकारणाभावेऽपि [159]उत्कण्ठारूपं कार्यं उत्पद्यते इति [160]कारणाभावात् कार्योत्पत्तिर्विभावना¥। इमावलङ्कारावत्र न स्फुटौ इह [161]कार्यानुत्पत्तिकोटरे [162]प्रतिपादनादस्फुटो विशेषोक्तिः। रेवारोधसि [163]कारणसामग्री कोटरवर्णनादस्फुटत्वम्। विभावनायाः अत्र बहूनां वाक्यानां दर्शनमात्रेण न दीपकम्। साधारणधर्मस्य [164]कस्यचिद्गुणस्य क्रियाया वा निर्देशाभावात्। ननु सा चैवास्मीत्यत्र अस्मीति [165]विभक्तिविपरिणामे स एव [166]वरोऽस्ति। ता एव चैत्रक्षपास्सन्ति। त एव कदम्बानिलास्सन्तीति क्रियारूपस्य धर्मस्य सर्वत्र सम्बन्धात् कथनं दीपकमिति [166]चेन्न। [167]अस्मीत्यहमित्यर्थे निपातः। अथापि क्रियापदम्। एवमपि न दीपकम्। तस्य प्रस्तुताप्रस्तुतविषयत्वात्। वरादीनां [168]च [169]सर्वेषामपि प्रस्तुतत्वादौपम्या [170]प्रतीतेर्धर्मस्य चानिर्देशात् [171]न तुल्ययोगिता। [172]गुणक्रियायौगपद्याभावान्न समुच्चयः। [173]ननु रसस्य [174]प्रतीयमानत्वाद्रसवदलङ्कारः [175]कुतो न स्यादित्याह। रसस्य हीत्यादि [176]प्रधानभूतो रसादिरलङ्कार्यः। अप्रधानभूतस्त्वलङ्कार इत्यालङ्कारिकाणां [177]तत्परमरहस्याम्।

## ‘मूलम्’

तद्भेदान् क्रमेणाह –

(सू.२) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।। ४ ।।

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य-व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिर-न्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य। यथा –

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे !
वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम्।।२।।

अत्र तदन्तिकमेव रन्तुं गताऽसीति प्राधान्येनाधमपदेन व्यज्यते।

## ‘साहित्यदीपिका’ टीका

ननु इदमुत्तममित्यादिना, किं [178]काव्यस्य सामान्यलक्षणं प्रतिपाद्यते, किं वा विशेषलक्षणम् [179]प्रतिपाद्यते, किं वा विशेषलक्षणं सामान्यलक्षणं प्रतिपादितमेवात्र तेन ध्वनिरूप एव विशेषप्रतिपाद्यते न सर्वे विशेषाः। [180]तदयुक्तमिदमुत्तममित्याद्युपन्यासः इत्याह। [181]तद्भेदानित्यादिक्रमेणेदमुत्तममित्यादिना [182]अतादृशीत्यादिना, शब्दचित्रमित्यादिनेत्यर्थः। [183]अतिशयोऽस्यास्तीत्यतिशयी, “एकाक्षरात्कृतो जातेस्सप्तम्यां च न तौ स्मृतौ” इति [184]तदप्यस्ति। तथापि कृदन्ताज्जातेश्च [185]प्रायिको निषेधः। यथा दण्डी [186]कार्यात्यादि वाच्यात्सातिशये [187]अतिचमत्कारकारिणि व्यङ्गे [188]काव्यमुत्तममुक्तिः। [188]एतदेव बुधैः ध्वनिपण्डितैर्ध्वनिरित्युक्तम्। न तु शब्दार्थौ काव्यम्। [189]ननु शब्दस्य ध्वनिव्यवहारो युज्यते [190]वैय्याकरणैर्व्यवहृतत्वात् [191]नानार्थस्येत्याह। वैय्याकरणैरित्यादि तुल्यन्याय्यत्वादिति भावः। यथा शब्दो [192]ध्वनयती ध्वनिः। तथा अर्थोऽपि [193]ध्वनयती [194]ध्वनिः। बुधैर्वैय्याकरणैरित्यत्र वैयाकरणैरित्यनेन बुधैरित्यस्यार्थो न कथ्यते। वैयाकरणैः [195]प्रधानभूतस्फोटरूपव्यङ्गव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। [196]ततस्तन्मतानुसारिभिरन्यैरपि बुधैरित्यन्वयः। न्यग्भावितमुपसर्जनीकृतं [197]काचित् पतिं प्रति प्रेषिता। तेन भुक्तां स्वदूतीं सेर्ष्यमाह।।
[198]निश्शेषेत्यादि। च्युतं [199]न तु [120]क्षालितां नितरां मृष्टं [201]निर्मृष्टं नत्वीषद्दूरमत्यन्तमनञ्जने [202]पुलकिता तन्वी [203]तथेत्युभयं विधेयं [204]दूतीमेवारीरमत्। अधमत्वम्, अधमपदसहायानां च्युतादीनां व्यञ्जकत्वम्। अत्र [205]वाच्याद्व्यङ्गस्य [206]चमत्कारस्तु। स्नातुं गतासीत्यनेन[207] [208]विधिना न स्नातुं गतासीति। [209]निषेधप्रतीतेर्न पुनरिति निषेधेन तदन्तिकमेव [210]रन्तुं गतासि, इति [211]विधिप्रतीतेः।

## ‘मूलम्’

(सू.३) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।

अतादृशि वाच्यादनतिशायिनि। यथा –

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया।। ३ ।।

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात्।।

### 'साहित्यदीपिका' टीका

अतादृशीति [212]अत्र [213]गुणीभूतव्यङ्गं कथितमित्यनुषज्यते। ग्रामतरुणमित्यत्र [214]ग्रामशब्देन तत्र स एव [215]वृषल इति द्योत्यते, पश्यन्त्या भवतीति [216]च वर्तमानव्यपदेशेन दर्शनमलिनीभावयोर-विरामस्सूच्यते।

### 'मूलम्'

(सू.४) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।। ५ ।।

**चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थ-रहितम्। अवरमधमम्। यथा –**

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्।। ४ ।।
विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयाऽपि यम्।
ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती।।५ ।।
इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथम उल्लासः।।१।।

### 'साहित्यदीपिका' टीका

शब्दचित्रमित्यादि। अव्यङ्ग्यं [217]काव्यमधममिति लक्षणम्। शब्दचित्रम्। वाच्यचित्रमित्येतद्विभागपरम्[218]। [219]नन्वस्य लक्षणकोटौ निवेशः। [220]गुणालङ्कारयुक्तत्वस्य [221]लक्षणकोटिनिवेशः काव्यसामान्यलक्षणेनैव प्राप्तत्वात्। गुणालङ्कारयुक्तत्वमिति[222]। गुणानां रसधर्मत्वादधमकाव्यस्य [223]गुणयोग औपचारिकः। गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मतेति स्वयमेव वक्ष्यति।। [224]शब्दचित्रमुदाहरति।

स्वच्छन्देत्यादि। अत्र [225]वृत्यनुप्रासः। नन्वत्र मन्दाकिनीविषयो [226]रतिलक्षणो भावोऽस्ति। तत्कथमव्यङ्गत्वमिति न वाच्यम्। अत्रानुप्रासे कवेस्तात्पर्यात् सन्नपि भावस्तिरोधीयते। यथा, सावित्रेण प्रकाशेन [227]चान्द्रमसीप्रभा तर्हि [228]ओजो लक्षणो [229]गुणः प्रतीयते इति चेत् प्रतीयताम्। गुणव्यतिरिक्तस्यैव व्यङ्गस्य स्फुटप्रतीतिः विरहोत्राप्यवगम्यते। अन्यथा, सगुणौ काव्यमिति काव्यत्वहानिप्रसङ्गात्। वाच्यचित्रमुदाहरति[230] विनिर्गतमिति।

[231]मानदमिति। [232]मानदमाश्रितानां [233]बहुमानात् परेषां मानं [234]गर्वं द्योततीति वा, मानदम्। अत्र यद्यपि वीरादिको रसोऽस्ति, [235]तथाप्युत्प्रेक्षायां कवेस्तात्पर्यात् [236]स तीरोधीयते।। [237]रत।

[238]इति श्रीभास्करसूरिविरचितायां साहित्यदीपिकायां काव्यप्रकाशटीकायां प्रथम उल्लासः।।

### संधर्व ग्रन्थ सूचि

1. हरिः। श्रीगणपतये नमः। अविघ्नमस्तु। ] D[1]; ओं नमो विघ्नविनाशते- D[2]
2. अथ काव्यप्रकाशव्याख्या ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
3. स्तनन्धयसुधाधामधाम्ने ] D[1]; स्तनन्धयसुधाधामधात्रे- D[2]
4. धाम्नेहि मन्यवे ] D;[1] धाम्नेस्तु वन्नवे- D[2]
5. किण्वादिदारिणे ] D[2]; कण्वादिदारिणे-D[1]
6. येषान्नमतिषु ] D[1]; येषां नमतिष्ठुत-D[2]
7. टीकायास्तासाम् विलसितमनातोकविषयान् ] D[1]; टीकास्त्रायासाम् विलसितमनालोकविषयानाम्-D[2]
8. गभीरान् शब्दार्थान् गमयति ] D[1]; भीरां शब्दार्था नामयति-D[2]
9. टीकाः ] D[1]; टेका-D[2]
10. परश्शताः ] D[1]; पराःशताः-D[2]
11. किं ताभिस्सुगमग्रन्थमात्रव्याख्यानचुञ्चुभिः ] D[1] ;टि ताभिसुगमग्रसमात्राव्याख्यानचुंचुति-D[2]
12. संगृह्यते मया ] D[1]; संष्टद्यते मयः-D[2]
13. त्यज्यतान्तमाम् ] D[1]; त्यज्यतातराः-D[2]
14. साहित्यदीपिका ] D[1]; साहात्यदीपिका-D[2]
15. भास्करसूरिणा ] D[1]; भास्करसूनुना-D[2]
16. मधूद्वहानाम् ] D[1]; मधुवहानाम्-D[2]
17. तेजनीयं ] D[1]; तेजनाय-D[2]
18. श्लोकेन ] D[1]; इदीविज-D[2]
19. वा ] D[1]; 'D[2]' मातृकायाम् अयं पाठः लुप्तः
20. प्रेक्षावत्प्रवृत्तेरङ्गभूतस्य ] D[1]; श्रोक्षावत्प्रवृत्तेरंगभूतस्य-D[2]
21. वा ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
22. पुनस्सर्वोत्कर्षेण ] D[1]; पुनस्सचोत्कर्ष-D[2]
23. प्रवृत्तेस्तदयन् नियतिकृतेत्यादेरुपन्यासो] D[1]; वृत्तिरिति नियतकृतेत्यादिरूपयासो -D[2]
24. संगच्छते ] D[1]; संगछत-D[2]
25. स्तुतिः ] D[2]; स्थितिः-D[1]

26. सर्वोत्कृष्टत्वम् ] D[1]; सर्वोत्कष्टत्वम्-D[2]
27. व्याप्तेः ] D[1]; व्याप्त्या-D[2]
28. नमस्काराक्षेपकार्यत्वात् ]D[1]; नमस्कारापेक्षा-D[2]
29. वक्ष्यत ] D[1]; वस्त्वंक्षति- D[2]
30. आक्षिप्यते ] D[1]; आक्षिप्यत- D[2]
31. इति ] 'D[1]' मातृकायाम् अयं पाठो लुप्तः
32. लभ्यते ] D[1]; लक्ष्यत-D[2]
33. इति ] D[2]; 'D[1]' मातृकायाम् अयं पाठो लुप्तः
34. निपाताश्चोपसर्गाश्च ] D[2]; निपातश्चोपसर्गाश्च-D[1]
35. इति ] D;[2] 'D[1]' मातृकायाम् अयं पाठो लुप्तः
36. जयतिरत्र ] D[1] ;जयतिः तत्र-D[2]
37. सर्वोत्कर्षो ] D[1] ;सर्वोत्कर्षे-D[2]
38. सर्वोत्कृष्टत्वप्रतिपादनेन] D[1] ;सर्वोत्कष्टप्रतिपादनेन-D[2]
39. भिहि ] D;[2] 'D[1]' मातृकायाम् अयं पाठो लुप्तः
40. वन्दे भारतीमित्युक्ते तदप्रकाशितम् ] D[1]; नववाद भारतीतित्युक्ते तत्प्रकाशितम् -D[2]
41. विशेषणविशिष्टाम् ] D[1]; विशेषेणविशिष्टाम्-D[2]
42. सर्वोत्कृष्टाम् D[1]; सर्वोत्कष्टां-D[2]
43. सर्वोत्कृष्टत्वप्रतिपादने तात्पर्यात् समुचितशब्देनासाधारणायुक्ता ] D[1]; सर्वोकृष्टत्वप्रतिपादने तात्पर्यः समुचितशब्देनयुक्तासाधारणा -D[2]
44. भक्तिः[ D[1] ; भक्तः-D[2]
45. श्रद्धातिशयविषयभूतेष्टा ] D[2]; श्रद्धातिशयभूता इष्टा-D[1]
46. हि ] D[2]; 'D[1]' मातृकायाम् अयं पाठो लुप्तः
47. नमस्कृत्य ] D[1]; नत्वा-D[2]
48. प्रारभ्यते ] D[2]; नारभते-D[1]
49. कविवाग्देवतैवाधिकृतेति ]D[1]; कविवाग्देवताधिकृतेति-D[2]
50. नियतीत्यादिः ] D[2]; नियतीत्यादि-D[1]
51. कमलत्वादजातिः ] D[1] ; कमलात्वादि-D[2]
52. कमलसौगन्ध्यादिकमनयेति ] D[1] ; कमलसौभाग्यदिकमनयेति-D[2]
53. विधिरिति केचित् ] D[1] ; विधिरत्यन्या-D[2]
54. हि ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
55. स्वयं दरित्येवायमीष्ट ] D[2]; अयं दरिद्धाति एवमयमिष्ट-D[1]
56. तत्कृतनियमरहिताम् ] D[2]; नियमरहितम्-D[1]
57. कमलादिना ताद्रुप्यं ह्लादैकमयीमित्यत्र ] D[1]; कमलादिन ताद्रूप्यां ह्लादीकमयीमित्र -D[2]
58. केचिदाहुः ] D[1]; केचिदहु-D[2]
59. समासः स ] D[1]; मासेपश्वा-D[2]
60. तत्र ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
61. प्राचुर्योमयडिति ] D;[2] प्राचुर्येमय-D[1]
62. ¥ तत्प्रकृतवचने मयट् (५.४.२१)
63. तदसत्मय ] D[2] ; 'D[1]' मातृकायाम् अयं पाठो लुप्तः
64. ह्लादैकमयीमिति ] D[1]; ह्लादैकमिति-D[2]
65. प्रयोगप्रसङ्गात् ] D[1]; प्रयोगप्रसंगावात्-D[2]
66. पूर्वकालैकेत्यादिना ] D[1]; पूर्वकालेत्यादिना-D[2]
67. सामासः ] D;[2] 'D[1]' मातृकायाम् अयं पाठो लुप्तः
68. पूर्वनिपातेन भवितव्यम् ] D[1]; पूर्वनिपात प्रसंगः-D[2]
69. विग्रहः कर्तव्यः ] D[1]; विग्रहातव्यम्-D[2]
70. यस्य ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
71. परस्य ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
72. कवेस्त्वदधीनैवेत्यर्थः अन्येत्वेहुः ] D[1]; कवेस्त्वधीनैवेत्यर्थः अन्येत्वाहुः -D[2]
73. परायन्तमात्रवचनः ] D[1]; आयन्तमात्रवचनः-D[2]
74. मत्परतन्त्रस्त्वत्परतन्त्र इति ] D[1]; मत्परत्यंत्रस्त्वत्यरंतत्र इतेन-D[2]
75. अतो नान्यपदेन ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
76. पौनरुक्त्यमिति ] D[1]; पोनरुक्तमिति-D[2]
77. रुचिरा ] D[1]; चिरा-D[2]
78. ब्रह्मसृष्टिषड्रसाः ] D[1]; षड्रासेव-D[2]
79. एतद्वैलक्ष्येण ] D[1]; एतद्विलक्ष-D[2]
80. एतद्विशेषणद्वयम् ] D[1]; ऐपनेवविशेषणद्वयम्-D[2]
81. व्याख्याने ] D[2]; 'D[1]' मातृकायाम् अयं पाठो लुप्तः
82. भवितव्यम् ] D[1]; भवतव्यम्-D[2]
83. ¥ दिक्संख्ये संज्ञायाम् (२.१.५०)
84. निर्मितमिति ] D[1]; 'D[2]' मातृकायाम् अयं पाठो लुप्तः
85. निर्मितम् ] D[2]; 'D[1]' मातृकायाम् अयं पाठो लुप्तः
86. विदधातीति ] D[1]; अदधतीति-D[2]
87. निर्मितिं कुर्वतीति ] D[1]; निर्मितकुर्वतीति-D[2]
88. पौनरुक्त्याभावादिति ] D[1]; पौनरुक्त्यभावात्-D[2]
89. अर्घ्यादिकया ] D[1]; अर्घादिकया-D[2]
90. पर्यपूजदित्यादि ] D[1]; सपर्यपूपूजदित्यादि-D[2]
91. अनेन श्लोकेन एतद्ग्रन्थप्रतिपाद्यं वस्तु अलंकाररसरूपध्वनित्रयं प्रदर्शितं भवति। जयत्यर्थेन---- नमस्काररूपं वस्तु ध्वन्यते, तथा केनचिद्यत्रधर्मेण द्वयेन संसिद्धिसाम्ययोः भवत्येकतराधिक्यं व्यतिरेकस्स उच्यते। ब्रह्मसृष्टेस्सकाशाद्वा निर्मितेर्व्यतिरेकालङ्कारः। रतिर्दैवादिविषयाभाव इत्यभिधीयते इति भारतीं प्रति

कवेः रतिलक्षणो भावः ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
92. ज्ञातुमशक्यत्वात् ] D[2]; ज्ञातुं दुश्शकत्वात्-D[1]
93. सहकारीत्यत्र दृष्टं कर्मशब्दः ] D[1]; सहकारीत्यत्रा दृषं कर्मशब्दे-D[2]
94. ग्रहणम् ] D[1]; ग्रहणात्-D[2]
95. तैः रसैः ] D[1]; ते रासैः-D[2]
96. कवेर्भारती ] D[1]; कवेभारती-D[2]
97. इति ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
98. लभ्यत इत्यभिप्रायः] D[1]; लक्ष्यः इत्यतिप्रायः -D[2]
99. अभिधानीये ] D[1]; भिधानीये-D[2]
100. ते ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
101. शालेयेनेष्टस्य फलस्य काञ्चिकधान्यमृगाणमनुकरोति इह ] D[1]; शालेयेनष्टस्य फालस्य कांजिकधान्यां मृगाणामनुकरोति यदिह-D[2]
102. इत्याशङ्क्याह ] D[1]; इत्याशंक्य-D[2]
103. प्रभृतिप्रयोजनविशिष्टकाव्यज्ञानस्वरूपम् ] D[1]; काव्यस्वरूपज्ञानम्-D[2]
104. काव्यस्य ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
105. लक्षणस्यापि ] D[2]; लक्षणस्य-D[1]
106. प्रयोजनानीति ] D[1]; प्रयोजनोति-D[2]
107. यशस इति ] D[1]; यशश इत्यादि-D[2]
108. कृद्विद्युज् ] D[1]; विद्यरु-D[2]
109. हेतुमाह ] D[1]; हेतुमहा-D[2]
110. तात्पर्यात् शब्दवाच्यार्थयोर्गुणभाव ] D[1]; तात्पर्यानूब्दा-D[2]
111. लोकोतेतरवर्णननिपुणः ] D[1]; वर्णनानिपुणः-D[2]
112. निपुणशब्दः ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
113. तु ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
114. कविनानुष्ठीयमानम् ] D[1]; कविनानुष्टीयमानम्-D[2]
115. कर्मणि ] D[1]; कार्मणि-D[2]
116. लभ्यते ] D[1]; लक्ष्यते-D[2]
117. लोकोत्तरवर्णननिपुणत्वविशेषणविशिष्टमिति ] D[1]; लोकोतेतरवर्णनानिपुणत्वविशेषितमिति-D[2]
118. योग औचित्यमिति ] D[1]; योगर्चिती-D[2]
119. तामनतिक्रम्य ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
120. सहृदयस्यैव निर्वृतिकाले] D[1]; सहृसेदयः स्यैव निर्वृत्तिकाले -D[2]
121. इत्यभिधानापर्यवसानादपरिपूर्णम् ] D[1]; इत्याद्यभिधावर्यवसानादपरिपूर्णम्-D[2]
122. सर्वथेत्यादि ] D[1]; सर्वाथत्यादि-D[2]
123. किम् ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
124. प्रमाणमित्याह ] D[1]; प्रमाणमाहे-D[2]
125. इति ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
126. शब्दस्य स्थितस्यार्थमाह ] D[1]; स्थितस्येति शब्दस्यार्थमाह-D[2]
127. समुदिताः ] D[1]; समुदिता-D[2]
128. समुदिताकारद्योतकत्वम् ] D[1]; समुदिताकारकारद्योतकत्वम्-D[2]
129. हेतुत्वात् ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
130. नोपपद्यते ] D[2]; नोपपद्येत-D[1]
131. न तु ] D[2]; ‘D[1]’ मातृकायाम् अयं पाठो लुप्तः
132. शब्दार्थावित्यादिना ] D[1]; वित्यादिना-D[2]
133. किम् ] D[2]; ‘D[1]’ मातृकायाम् अयं पाटो लुप्तः
134. नाद्यः ] D[1]; नद्यः-D[2]
135. तददोषावित्यादि ] D[1]; तब्ददोषावित्यादि-D[2]
136. नापि द्वितीयः ] D[1]; नोत्तरः-D[2]
137. अनलंकृतीव ] D[2]; अनलंकृती-D[1]
138. क्वापीत्यनेनालङ्काराराहित्यप्रतिपादने ] D[1]; प्रतिपादनेन-D[2]
139. स्यादित्याशंक्याह ] D[2]; इत्यत आह-D[1]
140. एवमस्येत्यादिना ] D[2]; एवमस्येतादि-D[1]
141. परिहरिष्यति ] D[1]; परिहरंद्यति-D[2]
142. लवोऽप्य ] D[1]; लवोप्यप्य-D[2]
143. गुणाः रससमवायिनो धर्माः ] D[1]; गुणा रससमंवायनो धर्मः-D[2]
144. स्फुटालंकारविरहेऽपि अलङ्कृतिमात्रमस्त्येव ] D[1]; स्फुटालंकृतिरंहितेऽलंकृतिरहिते मात्रमरत्भव-D[2]
145. अनलंकृतीत्युच्यते ] D[1]; इत्यच्यते-D[2]
146. ईषदर्थे वर्तते ] D[1]; नञीछीषदार्थ-D[2]
147. अनुदराकन्येतिवत् ] D[1]; नुंदराकन्येतिवत्-D[2]
148. क्वचिन्नायिका रेवातीरकृतसङ्केता परपुरुषरतिमपह्णुवाना सखीं प्रत्याह यः कौमारेत्यादि ] D[1]; ‘D[2]’ मातृकायाम् अयं पाठो लुप्तः
149. प्रथमतो यः कौमारमपनीतवान् सः कौमारहरः ] D[2]; प्रथमभोगेन कौमारमपनीतवान् कौमारहरः-D[1]
150. धूलीकदम्बाख्ये ] D[1]; धुलिकदंबाख्ये-D[2]
151. वर्तते ] D[1]; वर्त्तातत-D[2]
152. कदम्बमात्रग्रहणे ] D[1]; कदंबमात्रगृहणे-D[2]

153. सङ्गच्छते ] D1; संगछते-D2
154. तत्र ] D1; 'D2' मातृकायाम् अयं पाठो लुप्तः
155. सुरतव्यापारलीलाकरणे विषये ] D1; 'D2' मातृकायाम् अयं पाठो लुप्तः
156. स्फुटेन कश्चिदिति ] D1; स्फुट इति-D2
157. संभाव्येते ] D2 ;संभाव्यते-D1
158. कारणसामग्र्यं कार्यानुत्पत्तिर्विशेषोक्तिः ] D1 कारणसमग्र्यां कार्यानुत्पत्तिविशेषोक्ति-D2
159. ¥ विशेषोक्तिरखण्डेषु कारणेषु फलावचः। (का.प्र.)
160. सति हेतौ फलाभावो विशेषोक्तिः। (सा.द.)
161. रेवारोधसि ] D1; रेवरोधसि-D2
162. उक्तकारणाभावेऽपि ] D1; भावे-D2
163. उत्कण्ठारुपम् ] D1; ष्कण्ठतारूपम्-D2
164. कारणभावात् ] D1; कारणाभावे-D2
165. ¥ क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना। (का.प्र.)
166. विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते। (सा.द.)
167. कार्यानुत्पत्तिकोटरे ] D1; कोटेर-D2
168. प्रतिपादनादस्फुटो ] D1; प्रतिपादनास्फुटत्वं-D2
169. कारणसामग्री ] D2; सामग्री-D1
170. कस्यचिद्गुणस्य ] D1; चिद्गुणस्य-D2
171. विपरिणामे ] D2; परिणामे-D1
172. वरोऽस्ति ] D1; रोवरोस्ति-D2
173. चेन्न ] D1; चेत्-D2
174. अस्मीत्यहमित्यर्थे ] D1; अत्रार्थ-D2
175. च ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
176. सर्वेषामपि ] D2; सर्वेषाम्-D1
177. प्रतीतेर्धर्मस्य D1; प्रतीतेधर्मस्य-D2
178. न ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
179. गुणक्रियायौगपद्याभावान्न ] D1; पद्-D2
180. ननु ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
181. प्रतीयमानत्वाद् ] D1; प्रतीतियमानत्वाद्-D2
182. कुतो ] D1; त्कुतो-D2
183. हीत्यादि ] D1; इत्यादि-D2
184. तत्परमरहस्याम् ] D1; परमरहस्याम्-D2
185. काव्यस्य ] D1; कध्यस्य-D2
186. प्रतिपाद्यते किं वा विशेषलक्षणं सामान्यलक्षणं प्रतिपादितमेवात्र तेन ध्वनिरूप एव विशेषप्रतिपाद्यते न सर्वे विशेषाः ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
187. तदयुक्तमिदम् ] D1; तदयुक्तेमिदम्-D2
188. तद्भेदानित्यादिक्रमेणेदमुत्तममित्यादिना ] D1; इत्यादि-D2
189. अतादृशीत्यादिना शब्दचित्रमित्यादिनेत्यर्थः] D1; 'D2' मातृकायाम् अयं पाठो लुप्तः
190. अतिशयोऽस्यास्तीत्यतिशयी] D1; अतिसयोस्यास्तीतियित्तिशयी-D2
191. तदप्यिस्त ] D1; यद्यध्यस्ति-D2
192. प्रायिको ] D1; प्रापियिको-D2
193. कार्यात्यादि D1; कार्यत्यादि-D2
194. अतिचमत्कारकारिणि ] D1; तिचमत्कारकारिणि-D2
195. काव्यमुत्तममुक्ति ] D2; काव्यमुत्तमम्-D2
196. एतदेव बुधैः ध्वनिपण्डितैः ] D1 ;यत्ताव बुद्धेः पंडितैः-D2
197. ननु ] D1; 'D2' मातृकायाम् अयं पाठो लुप्तः
198. वैय्याकरणैर्व्यवहृतत्वात् ] D1; व्याहृतत्वात्-D2
199. नानार्थस्येत्याह ] D1; नार्थस्येत्याह-D2
200. ध्वनयती ] D2; ध्वनीतीति-D1
201. ध्वनयती ] D2; ध्वननीति-D1
202. ध्वनिः ] D1; ध्वनित-D2
203. प्रधानभूतस्फोटरूपव्यंगव्यञ्जकस्य] D1; प्रधानस्फोटरूपव्यंगव्यञ्जकस्य-D2
204. अन्यैरपि ] D1; अन्येरपि-D2
205. काचित् पतिं प्रति प्रेषिता तेन भुक्तां स्वदबतीं सेर्ष्यमाह ] D1 ;'D2' मातृकायाम् अयं पाठो लुप्तः
206. निश्शेषेत्यादि ] D1; निःशेषेति-D2
207. न तु ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
208. क्षालिताम् ] D2; क्षालितम्-D1
209. निर्मृष्टम् ] D1 ;'D2' मातृकायाम् अयं पाठो लुप्तः
210. अनञ्जने ] D1; अनंजनेः-D2
211. तथेत्युभयम् ] D1; त्युभयम्- D2
212. दूतीमेवारीरमत् ] D1; मेवारीरमदिति-D2
213. वाच्याद्यंगस्य ] D2; वाच्याद्यंगयस्य-D1
214. चमत्कारस्तु ] D2; चमत्कारः-D1
215. इत्यनेन ] D2; इति-D1
216. विधिना न स्नातुं गतासीति ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
217. निषेधप्रतीतेर्न पुनरिति ] D1; निषेधतीतेन पुनुरिति-D2
218. रन्तुम् ] D1; रंतुम्-D2
219. विधिप्रतीतेः ] D2; प्रतीतेः- D1
220. अत्र ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
221. गुणीभूतव्यङ्ग्यम् ] D1; गुणीभूतव्यम्-D2
222. ग्रामशब्देन ] D1; ग्रामशब्दे-D2

223. वृषल ] D1; वृष-D2
224. च ] D1 ;'D2' मातृकायाम् अयं पाठो लुप्तः
225. काव्यमधममिति ] D1; काव्यमित्यधम-D2
226. विभागपरम् ] D1; विभागपदम्-D2
227. नन्वस्य ] D2; न-D1
228. गुणालङ्कारः ] D1; राणालंकारः-D2
229. लक्षणकोटिनिवेशः ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
230. युक्तत्वमिति ] D1; युक्तमिति-D2
231. गुणयोगः ] D1; गणयोगः-D2
232. शब्दचित्रमुदाहरहिति ] D2 ;'D1' मातृकायाम् अयं पाठो लुप्तः
233. वृत्यनुप्रासः ] D1; वृत्यनुपासव-D2
234. रतिलक्षणो ] D1; रितिलक्षणो-D2
235. चान्द्रमसीप्रभा ] D1; चांद्रमशीप्रभा-D2
236. ओजो लक्षणो [ D1; 'D2' मातृकायाम् अयं पाठो लुप्तः
237. गुणः ] D1; गुणे-D2
238. उदाहरति ] D1; उदारति-D2
239. मानदमिति ] D2; 'D1' मातृकायाम् अयं पाठो लुप्तः
240. मानदमाश्रितानाम् ] D1; मानमाश्रितानाम्-D2
241. बहुमानात् ] D1; बहुमानंदम्-D2
242. गर्वम् ] D1; यंदर्पगम्-D2
243. तथाप्युत्प्रेक्षायाम् ] D1; तथ्यास्युत्प्रेक्षायाम्-D2
244. स तिरोधीयते ] D2; सतीरोधीयते- D1
245. रत ] D1 ;'D2' मातृकायाम् अयं पाठो लुप्तः
246. इति श्रीभास्करसूरिविरचितायां साहित्यदीपिकायां काव्यप्रकाशटीकायां प्रथम उल्लासः ] D2 ;इति श्रीभास्करमिश्रविरचितायां काव्यप्रकाशदीपिकायां साहित्यदीपिकायां प्रथम उल्लासः-D1

## सङ्केताक्षरसूची

1. ◎ D1—Government Oriental Manuscripts Library, Madras. Mss No.—R-2745
2. ◎ D2---Bhandarkar Oriental Research Institute, Pune. Mss No.—109-1919-24
3. ◎ < >* इति चिह्नद्वयेन शुद्धपाठाः दर्शिताः, पठितॄणां ज्ञानाय चिह्नस्य पूर्वम् अशुद्धः मातृकापाठः प्रदत्तः अस्ति, कोष्ठकमध्ये शुद्धपाठो दत्तमस्ति।
4. ◎ Ψ चिह्नेन बहुपरिशीलने कृतेऽपि परिष्कर्तुं अशक्याः पाठाः निर्दशिताः।
5. ◎ ¥ चिह्नेन सूत्रं प्रदर्शतम्।
6. ▪का.प्र.- काव्यप्रकाशः
7. ▪सा.द.- साहित्य दर्पणः

## सहायकग्रन्थसूची


1. झलकीकर। काव्यप्रकाशव्याख्या। परिमल पब्लिकेशन, दिल्ली
2. आचार्य विश्वेशर सिद्धान्तशिरोमणि। आज भवन, सन्त कबीर मार्ग, वाराणसी- 221001 (यू.पी.)
3. Sushil Kumar. History of Sanskrit Poetics 1.
4. A Descriptive Catalogue of Sanskrit Manuscript. (Kavya and Alankar) Bhandarkar Oriental Research Institute 1944, 4.
5. Dr. V. Raghavan. New Catalogus Catalogorum (NCC). Madras University 1968.
6. संस्कृत-हिन्दीशब्दकोशः, वामन शिवराम आप्टे, सम्पा.- उमा प्रसाद पाण्डेय, New Edition, New Delhi: Shree Prakashan.